# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय ५

ऋश्यमूकात्तु हनुमान्गत्वा तं मलयं गिरम् ।
आचचक्षे तदा वीरौ कपिराजाय राघवौ ॥१॥

अयं रामो महाप्राज्ञः सम्प्राप्तो दृढविक्रमः ।
लक्ष्मणेन सह भ्रात्रा रामोऽयं सत्यविक्रमः ॥२॥

इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः ।
धर्मे निगदितश्चैव पितुर्निर्देशपालकः ॥३॥

तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः ।
रक्षसापहृता भार्या स त्वां शरणमागतः ॥४॥

राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः ।
दक्षिणाश्च तथोत्सृष्टा गावः शतसहस्रशः ॥५॥

तपसा सत्यवाक्येन वसुधा येन पालिता ।
स्त्रीहेतोस्तस्य पुत्रोऽयं रामस्त्वां शरणं गतः ॥६॥

भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ ।
प्रतिगृह्यार्चयस्वेमौ पूजनीयतमावुभौ ॥७॥

श्रुत्वा हनुमतो वाक्यं सुग्रीवो हृष्टमानसः ।
भयं स राघवाद्घोरं प्रजहौ विगतज्वरः ॥८॥

स कृत्वा मानुषं रूपं सुग्रीवः प्लवगाधिपः ।
दर्शनीयतमो भूत्वा प्रीत्या प्रोवाच राघवम् ॥९॥

भवान्धर्मविनीतश्च विक्रान्तः सर्ववत्सलः ।
आख्याता वायुपुत्रेण तत्त्वतो मे भवद्गुणाः ॥१०॥

तन्ममैवैष सत्कारो लाभश्चैवोत्तमः प्रभो ।
यत्त्वमिच्छसि सौहार्दं वानरेण मया सह ॥११॥

रोचते यदि वा सख्यं बाहुरेष प्रसारितः ।
गृह्यतां पाणिना पाणिर्मर्यादा वध्यतां ध्रुवा ॥१२॥

एतत्तु वचनं श्रुत्वा सुग्रीवस्य सुभाषितम् ।
सम्प्रहृष्टमना हस्तं पीडयामास पाणिना ।
हृद्यं सौहृदमालम्ब्य पर्यष्वजत पीडितम् ॥१३॥

ततो हनूमान्सन्त्यज्य भिक्षुरूपमरिन्दमः ।
काष्ठयोः स्वेन रूपेण जनयामास पावकम् ॥१४॥

दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम् ।
तयोर्मध्ये तु सुप्रीतो निदधे सुसमाहितः ॥१५॥

ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ।
सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ॥१६॥

ततः सुप्रीत मनसौ तावुभौ हरिराघवौ ।
अन्योन्यमभिवीक्षन्तौ न तृप्तिमुपजग्मतुः ॥१७॥

ततः सर्वार्थविद्वांसं रामं दशरथात्मजम् ।
सुग्रीवः प्राह तेजस्वी वाक्यमेकमनास्तदा ॥१८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com